**दिनाङ्क :- 06.07.2024**
**प्रात:  - 06: 55**

**विदेशमन्त्रालय:/प्रधानमन्त्रियात्रा**

द्वाविंशतितमे भारत-रूस-वार्षिक-शिखर-सम्मेलने रक्षा, व्यापार:, निवेश:, ऊर्जा, शिक्षा, विज्ञानं, प्राविधिकी, संस्कृतिः च केन्द्रीभूताः प्रमुखचर्चाबिन्दवः भविष्यन्ति । नवदिल्ल्यां वार्ताहरसम्मेलने विदेशसचिवः विनयमोहनक्वात्रा एवम् उक्तवान् । अस्मिन् मासे अष्टमदिनाङ्कात् दशमदिनाङ्कपर्यन्तं रूस-आस्ट्रिया-देशयोः प्रधानमन्त्रिणो: आधिकारिकयात्रायाः विषये श्रीक्वात्रा अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी रूसस्य राष्ट्रपतिः व्लादिमीर् पुतिनः च द्वयोः देशयोः बहुपक्षीयसम्बन्धानां समीक्षां करिष्यत: । सः अवदत् यत् तौ परस्परिक समकालीनक्षेत्रीयवैश्विकविषयेषु च विचारणां करिष्यतः।

**नीट-पीजी-परीक्षा**

चतुर्विंशत्यधिक-द्विसहस्रतमवर्षस्य नीट-पीजी इति प्रवेशपरीक्षा आगामिमासस्य एकादशदिनाङ्के कालद्विधा विभज्य भविष्यति। राष्ट्रिय-आयुर्विज्ञान-परीक्षा-मण्डलेन ह्य: परीक्षायाः संशोधिता समयसारणी प्रसारिता। गतमासे परीक्षायाः निर्धारितदिनात् एकदिनपूर्वमेव परीक्षा स्थगिता जाता आसीत्। कतिपयप्रतियोगिपरीक्षाणां सत्यनिष्ठायाः आरोपानन्तरं एषः निर्णयः कृतोऽस्ति।

**अमरनाथयात्रा/श्रीनगरम्**

जम्मू-कश्मीरे वार्षिकी-अमरनाथयात्रा सुचारुतया प्रचलति। दर्शनस्य षष्ठे दिवसे भगवतः अमरनाथस्य पवित्रगुहायाम् अष्टसप्तत्यधिक-नवशतोत्तर-चतुर्विंशतिसहस्रं तीर्थयात्रिणः दर्शनं कृतवन्तः। एतेन सहैव जूनमासस्य ऊनत्रिंशत् दिनाङ्कतः यात्रायाः आरम्भात् गतदिवसपर्यन्तं प्रायः त्रिंशत्-सहस्रोत्तरैकलक्षाधिक-तीर्थयात्रिणः देशस्य विभिन्नभागेभ्यः पवित्रगुहां प्रति दर्शनार्थं प्राप्तवन्त: ।

**रेलमन्त्री-वैष्णवः**

केन्द्रीयमन्त्री अश्विनीवैष्णवः ह्य: उक्तवान् यत् भारतीयरेलविभागः वर्षेऽस्मिन् सार्धद्विसहस्रपरिमितानां रेलयानप्रभागानां विनिर्माणं विधास्यति, तदनन्तरञ्च इतोऽपि दशसहस्र-प्रभागानां निर्माणं भविष्यति। श्रीवैष्णवः भारतीयरेल-विभागस्य गतिशक्ति-विश्वविद्यालयेन सह प्रतिष्ठितस्य एयरबस् इत्यस्य वाणिज्यिक-विमान-निर्मातृ-समवायस्य मध्ये सन्धिपत्रस्योपरि हस्ताक्षरकाले एवम् उक्तवान्।

**रक्षोत्पादनानि**

भारतदेशेन निवर्तमानसत्रे रक्षोत्पादनमूल्येषु अभूतपूर्वा वृद्धिः समुट्टङ्कितास्ति। वर्षेऽस्मिन् एषा वृद्धिः प्रायशः नवशतोत्तराष्ट-सहस्राधिकषड्विंशति-लक्षाधिकैक-लक्षकोटि-रूप्यकाणामस्ति, या हि गतवर्षस्य तुलनायां दशमलवाष्टाधिक-षोडशप्रतिशतम् अधिकास्ति। रक्षामन्त्रिणा राजनाथसिंहेन सामाजिकप्रसारतन्त्रे प्रसारिते सन्देशे उक्तं यत् प्रधानमन्त्रिणः

नरेन्द्रमोदिनः नेतृत्वे मेक-इन-इण्डिया इति कार्यक्रमः निरन्तरं नवकीर्तिमत् स्थापयन्नस्ति। श्रीसिंहेन रक्षासार्वजनिक-क्षेत्रस्योपक्रमाः, रक्षावस्तुविनिर्माणे संलग्नानि अन्योद्यमान्यपि प्रंशसितानि। विषयस्यास्य प्रशंसां प्रधानमन्त्री नरेन्द्रमोदी अपि अकरोत्।

**ब्रिटेन-निर्वाचनम्**

ब्रिटेनदेशस्य संसदीयनिर्वाचने लेबरपार्टीतिदलस्य विजयः अभवत् । दलस्यास्य नेता कीर-स्टार्मरः निवर्तमानप्रधानमन्त्रिणः ऋषिसुनकस्य कंजर्वेटिवपार्टीति दलम् पराभूय न्यूतन: प्रधानमन्त्री अभवत् ।

प्रधानमन्त्री नरेन्द्रमोदी ब्रिटेन-संसदीय-निर्वाचने विजेत्रे कीरस्टार्मर इत्यस्मै वर्धापनानि अयच्छन् उक्तवान् च यत् सकारात्मकगत्या अग्रेवर्धनाय, भारतब्रिटेनयोर्मध्ये सहयोगपुरस्सरं कार्याचरणाय च वयं सन्नद्धाः स्मः।

**।। इति वार्ता: ।।**